घ्राणतर्पणः, पुं, (घ्राणमिन्द्रियविशेषं तर्पयतीति। तृप+ल्युः।) सुगन्धिः। इत्यमरः। २।५।११॥ (यथा, रामायणे। २।६४।१४। "घ्राणतर्पणमभ्येत्य कं नरं न प्रहर्षयेत्॥")

घ्राणदुःखदा, स्त्री, (घ्राणस्य दुःखं ददातीति। दा+कः। स्त्रियां टाप्।) छिक्किनी। इति भावप्रकाशः॥

घ्रातः, त्रि, (घ्रा+क्तः। "नुदविदेति।" ८।२।५६। इति पाक्षिको नत्वाभावः।) गृहीतगन्धपुष्पादिः। घ्राण लओया इति सोंका इति च भाषा। तत्पर्य्यायः। घ्राणः २। इत्यमरः। ३।१।९०॥ शिङ्घितः ३। इति जटाधर-शब्दरत्नावल्यौ॥ (यथा, मनुः। ५।१२५।
"पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम्।
दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति॥")

घ्रातिः, स्त्री, (जिघ्रत्यनया। घ्रा+करणे क्तिन्।) नासिका। इति शब्दचन्द्रिका॥ (भावे क्तिन्। आघ्राणम्। यथा, मनुः। ११।६७।
"ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः॥")

## ङ

ङ, ङकारः। स तु व्यञ्जनपञ्चमवर्णः। अस्योच्चारणस्थानं सनासिककण्ठः। इति व्याकरणम्॥ ("जिह्वामूले तु कुः प्रोक्तः।" इति।
"अनुस्वारयमानाञ्च नासिकास्थानमुच्यते॥"
इति च शिक्षोक्तेस्तथात्वम्॥)
अस्य स्वरूपं यथा, कामधेनुतन्त्रे।
"ङकारं परमेशानि! स्वयं परमकुण्डली।
सर्व्वदेवमयं वर्णं त्रिगुणं लोललोचने!॥
पञ्चप्राणमयं वर्णं ङकारं प्रणमाम्यहम्॥"
अपि च।
"ऊर्द्ध्वाधःक्रमतो रेखा किञ्चिदाकुञ्चिता ततः।
अधोगता कुण्डली तु मात्रा शक्तिस्वरूपिणी॥
रेखात्रयेषु ब्रह्मेशविष्णवः सन्ति देवताः॥
ध्यानं यथा, वर्णोद्धारतन्त्रे।
"धूम्रवर्णां महाघोरां ललज्जिह्वां चतुर्भुजाम्।
पीताम्बरपरीधानां साधकाभीष्टसिद्धिदाम्॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

तस्य नामानि यथा,—
"ङः शङ्खी भैरवश्चण्डो बिन्दूत्तंसः शिशुप्रियः।
एकरुद्रो दक्षनखः खर्परो विषयस्पृहा॥
कान्तिः श्वेताङ्कुशो घोरो द्विजात्मा ज्वालिनी वियत्।
मन्त्रशक्तिश्च मदनो विघ्नेशी चात्मनायकः॥
एकनेत्रो महानन्दो दुर्द्धरश्चन्द्रमा यतिः।
शिवघोषा नीलकण्ठः कामेशी च मयांशुकौ॥"
इति नानातन्त्रशास्त्रम्॥
(मातृकान्यासे अस्य दक्षिणकराङ्गुलाग्रेषु न्यस्यता॥)

ङः, पुं, (ङयते शब्द्यते इन्द्रियैरिति। ङु+बाहुलकात् डः।) विषयः। विषयस्पृहा। इति मेदिनी। ङे। १॥ भैरवः। इत्येकाक्षरकोषः॥ (यथा, स्तुतिपञ्चाशत्।
"ङवन्दिते! ङलिखिते! ङकारवर्णरूपिणि!॥")

ङु, ङ ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-अनिट्।) ङ, ङवते। इति दुर्गादासः॥